Reg. No. | | | | | | | | | |

**BCMSKLN 201**

**Second Semester B.Com. Degree Examination, September 2022**
**(NEP 2020) (2021-22 Batch Onwards)**
**SANSKRIT LANGUAGE (AECC)**

Time : 2 Hours Max. Marks : 60

***सूचना :*** *1)* ***संस्कृतभाषया कर्णाटकभाषया, आङ्गलभाषया*** *वा उत्तराणि लिखत ।*

*2) प्रश्नसंख्या* ***IV*** *तथा* ***V*** *एतयो: उत्तराणि* ***संस्कृतभाषया*** *एव लेखनीयानि ।*

I. **एकं** अनुवादं कृत्वा विवृणुत । **(1×5=5)**

1) एवं सम्प्रधार्य भूयोऽपि अचिन्तयत् – 'तदहं अनशनं कृत्वा प्राणान् उत्सृजामि । किमनेन व्यर्थजीवितव्यसनेन ?' इति निश्चयं कृत्वा सुप्त: । अथ तस्य स्वप्ने पद्मनिधि: क्षपणकरूपो दर्शनं दत्त्वा प्रोवाच – 'श्रेष्ठिन् , मा त्वं वैराग्यं गच्छ । अहं पद्मनिधि: तव पूर्वपुरुषोपार्जित: । तदनेनैव रूपेण प्रात: तव गृहमागमिष्यामि । तत्त्वयाहं शिरसि ताडनीय:, येन कनकमयो भूत्वा अक्षयो भवामि ।'

अथ प्रात: प्रबुद्ध: सन् स्वप्नं स्मरन् चिन्ताचक्रमारूढ: तिष्ठति – 'अहो, सत्योऽयं स्वप्न: किं वा असत्यो भविष्यति, न ज्ञायते । अथवा नूनं मिथ्या अनेन भव्यम् । यतोऽहम् अहर्निशं केवलं वित्तमेव चिन्तयामि ।

2) तावत् त्रिगर्तराज: सुशर्मा प्राह – 'कुरुपते गोमान् सम्पन्नश्च विराट: कीचकबलेन अप्रधृषश्च सन् असकृत् मम विप्रियमचारीत् । अद्य तु ईषज्जयोऽयम् । अत: तदभियोगे तव कोशवृद्धि: मित्रार्थसिद्धिश्चेति उभार्थता भवति । तथा रोचतां भवते' इति । सोऽपि तथेति प्रथमं दक्षिणभागे गोग्रहणार्थं तं नियुज्य तत: स्वयमपि दण्डयात्रामादिदेश ।

उदीच्यां सर्वं गोधनं कुरुभि: अपह्रियमाणं आकर्ण्य वैराटिरुत्तर: – 'यदि कश्चित् कुशलं यन्तारम् आप्नुयां तदा सव्यसाचिनमपि मम आजिमुखे क्लैब्यभाजं पश्येयं किमुतापरान्' इति स्त्रीसमक्षम् उद्घोषयन् सन् , मदान्धं दुर्योधनं दमयितुकामेन पार्थेन प्रयुक्तया तथा स्वयमपि भर्तु: अधिक्षेपवचनम् असहमानया कृष्णया ऊचे ।

II. **चत्वारि** वाक्यानि सप्रसङ्गं विवृणुत । **(4×3=12)**

1) सत्यान्न प्रमदितव्यम् ।

2) शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ।

3) अहो धिगियं दरिद्रता ।

4) प्रभो, मरणं सर्वेषाम् अनिवार्यम् ।

5) मूढो हि मदनेन आयास्यते ।

6) नृणामेको गम्यस्त्वमसि पयसाम् अर्णव इव ।

III. **त्रीन्** प्रश्नान् प्रबन्धरूपेण उत्तरयत । **(3×8=24)**

1) गृध्रपतिः कथम् अक्षयां कीर्तिं लेभे ? निरूपयत ।

2) 'अपरीक्ष्य न कर्तव्यम्' – पाठस्य सारं लिखत ।

3) बीरबलस्य बुद्धिकौशलं पाठोक्तरीत्या वर्णयत ।

4) कपिञ्जलः पुण्डरीकं किम् उपदिष्टवान् ? निरूपयत ।

5) श्रीशङ्कराचार्याणां जीवनचरित्रं परिचाययत ।

IV. **एकं** संस्कृतेन टिप्पणीं लिखत । **(1×4=4)**

1) रामायणम् ।

2) उपनिषत् ।

3) श्री रामानुजाचार्याः ।

V. निर्देशानुसारं **पञ्च**दशवाक्यानि पूरयत । **(15×1=15)**

अ) रेखाङ्कितपदस्य कारकं सूचयत ।

1) <u>जटायुः</u> पादपस्थः जगाद । (कर्म, करणं, कर्तृ)

2) सः <u>तारस्वरेण</u> श्लोकम् अपठत् । (कर्म, करणं, कर्तृ)

3) <u>आचार्याय</u> प्रियं धनं दद्यात् । (कर्म, सम्प्रदानं, कर्तृ)

4) वैराटिः <u>स्यन्दनात्</u> अवप्लुत्य धावति । (कर्म, सम्प्रदानं, अपादानम् )

5) अस्मिन् <u>देशे</u> सिंहानां पीडा अस्ति । (अपादानम् , करणं, अधिकरणं)

आ) वाक्यदोषान् परिहरत ।

1) <u>महाराजस्य</u> सह अत्यन्तं वैरमस्ति ।

2) वृद्धवानर, अलं <u>चिन्ता</u> ।

3) स्वाध्यायेन मा प्रमदः ।

4) गुरोः परितः शिष्याः उपविशन्ति ।

5) तृष्णे देवि नमः तव ।

इ) सन्धिनाम लिखत ।

1) दिव्य + अस्त्राणि – दिव्यास्त्राणि । (गुणसन्धिः, यण्सन्धिः, सवर्णदीर्घसन्धिः)

2) प्र + उवाच – प्रोवाच । (गुणसन्धिः, यण्सन्धिः, सवर्णदीर्घसन्धिः)

3) अर्जुनः + तु – अर्जुनस्तु । (वृद्धिसन्धिः, यण्सन्धिः, विसर्गसन्धिः)

4) अति + उदात्तः – अत्युदात्तः । (वृद्धिसन्धिः, यण्सन्धिः, विसर्गसन्धिः)

5) वाक् + ईशः – वागीशः । (जश्त्वसन्धिः, गुणसन्धिः, श्चुत्वसन्धिः)

ई) समासनाम सूचयत ।

1) न सकृत् – असकृत् । (बहुव्रीहिः, द्वन्द्वः, नञ् तत्पुरुषः)

2) दिव्यं च तत् अस्त्रं च – दिव्यास्त्रम् । (कर्मधारयः, तत्पुरुषः, बहुव्रीहिः)

3) मन्दा बुद्धिः यस्य–मन्दबुद्धिः । (द्विगुः, तत्पुरुषः, बहुव्रीहिः)

4) शूलः हस्ते यस्य – शूलहस्तः । (द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः)

5) नरश्च नारायणश्च – नरनारायणौ । (द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः)

---